नं: १४१ - घ
वादसुधाकरः (व्याकरणम्)
पत्राणि १५

नं० १४१-घ

वाद सुधाकरः

पत्राणि १५

नं० १४१-घ

वादसुधाकर

व्याकरण

ख

ॐ श्रीगणेशाय नमः ॐ शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति इति वाक्यस्वल्पवान्विभ्रान्तद्वयमध्यानमाधवः १ कोलाहलो
त्रकुधियां न यत्सहो विवेकिनाम् कलिदोषेरमानाथ यदाम समीहेन वोदितम् २ आख्यातस्य कृतौ शक्तिर्न्नैव कर्त्तरि कृत्स्नाश्र
यत्वमेव हि कर्त्तृत्वेन स्वकृतिरूपमिति नेतत्कृतौ नाशकतावच्छेदकत्वे गौरवादिति तार्किकाः न चैवं रथो गच्छतीत्यादावचेतने
रथे कृते बाधादाश्रयत्वादौ लक्षणयोलस्यतावच्छेदकगौरवेण साम्यमिति वाच्यम् अतिरिक्तशक्तिकल्पनापेक्षया लक्षणा
यां शक्यसम्बन्धरूपलक्षणायां गौरवाभावात् न च लक्षणाश्रयणे कथं वर्त्तमानत्वादीनामन्वयः शृणपच्छतिद्वयानभ्यु
गमादिति चेन्न शक्ततावच्छेदकलक्षकतावच्छेदकयोर्भेदात् लड्त्वेन हि वर्त्तमानत्वे शक्तिः लकारत्वेन तु ल
क्षणेति अत एव सकृदुच्चरितः इति न्यायात् कथं कृतिवर्त्तमानत्वयोर्युगपद्बोध इत्यपि नाशंक्यम् लकारत्वलट्त्वरूपशक्तता
वच्छेदकभेदात् न च तथापि लक्षणाज्ञानजन्याश्रयत्वाद्युपस्थितेर्हेतुत्वकल्पने गौरवमिति चेन्न तद्विषयकशाब्दबोध
स्य तत्तद्विषयकवृत्तिज्ञानजन्योपस्थितित्वेनैव हेतुत्वतया लक्षणाज्ञानस्य पृथक्हेतुत्वाभावात् घटपदात्समवायेनाकाश
स्मरणे तद्वारकशाब्दबोधवारणाय वृत्तिज्ञानजन्योपस्थितिविशेषणम् अथैवमतत्कृतत्वादीनां संसर्गेण शाब्दबोधविषयत्वेऽ
लेभमिति चेन्न घटपदादुपस्थितस्य घटत्वस्य विशेष्यतयान्वयवारणाय तद्धर्मप्रकारकतद्विशेष्यकशाब्दबोधं प्र
ति तद्धर्मप्रकारकतद्विशेष्यकवृत्तिज्ञानजन्योपस्थितेर्हेतुत्वमावश्यकतया संसर्गस्य तद्धर्मप्रकारकत्वाभावे नादोषात् १

स्यादेतत् हृतस्यानुपस्थितस्यापि संसर्गस्य शाब्दबोधविषयत्वे राजपुरुष इत्यादौ यावत्सम्बन्धभानापत्तिः जन्यजनकभावादेर
पि सम्भवादिति चेन्न तात्पर्यस्य नियामकत्वात् अत्रेदमवधेयम् आख्यातस्य कर्तृवाचकत्वाभावे पच्यते तण्डुलेनेत्या
दौ कर्मवत्कर्मणा तुल्यक्रिय इत्यतिदेशात्कर्मणि द्वितीयापत्तिः वैयाकरणानां तु लिङ्याशिष्यङिति ङिल्लकारकाद्व
इत्यनुवृत्तेर्लकारवाच्यः कर्त्ता कर्मवदित्यर्थान्नातिप्रसङ्गः भावे लकारे च लकारेण कर्तुरनुपस्थितेः नवलकारवा
च्यकर्त्राश्रयः कर्मवदित्यर्थान्निस्तारः शेकाः पच्यते तण्डुल इत्यत्र लकारस्य विक्लित्याश्रयवाचकत्वेन कर्तृवाचकत्वा
भावात् तदाश्रयत्वस्याप्यसम्भवाच्च नवलकारार्थसंख्याश्रयः कर्मकर्त्ता कर्मवदित्यर्थ इति वाच्यम् पच्यमानस्तण्
डुल इत्यादौ लकारेण संख्याया अनुपस्थित्या कर्मवद्भावानापत्तेः अत एव लकारार्थकर्त्राश्रयः कर्मवदित्यर्थे·
ऽप्यत्र न निर्वाहः किं च लक्षणायाः शक्यानुसन्धानपूर्वकत्वाल्लक्षणायां लाघवविनिर्मुक्तिकमेव अत एव निषादस्थपतिं
याजयेदित्यत्र निषादश्चासौ स्थपतिश्चेति कर्मधारयेण तु निषादानां स्थपतिरिति तत्पुरुषः पूर्वपदे लक्षणाप्रसङ्गा
दिति सकलसिद्धान्तः अत एव राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र राजा च पुरोहितश्चेति द्वन्द्वेन तु राज्ञः पुरो·
हिताविति तत्पुरुषो लक्षणाप्रसंगादिति सर्वसिद्धान्तः अत एवोद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दः कर्मनाम
धेयम् उद्भिच्छब्देन खनित्रादिके गृहीते उद्भिद्वता यागेनेत्यर्थाश्रयणे मत्वर्थलक्षणापत्तिरिति उद्भिदधिकरणे सङ्ग

श्रीः
दुर्गैः
व॰वा॰
सु॰
२

च्छते वस्तुतस्तु फलव्यापारयोरुभयोर्धातुलभ्यत्वादाख्यातशक्तिद्वयमाश्रयत्वमेवाख्यातशक्यतावच्छेदकमिति न गौरव
सम्भावना तार्किकपरिषया यत्नत्वस्यैव शाब्दिकपरिषयाश्रयत्वस्याप्यतिरिक्तत्वे बाधकाभावात् जलपदशक्यता
वच्छेदकतया जलत्वं जातिरिति वर्द्धमानोपाध्यायरीत्याख्यातशक्यतावच्छेदकतयाश्रयत्वस्यापि जातित्वात् कु
मारी भार्येत्यादौ जातेश्चेति पुंवद्भावप्रतिषेधसिद्धये कौमारादीनामपि जातित्वमभ्युपगच्छता भाष्यकारादीनां निसैव
जातिरिति नियमाभावात् अत एव दीधितिकृतापि सिद्धान्तलक्षणेऽधिकरणत्वादीनामतिरिक्तत्वं स्वीकृतम् तस्याधि
धिकरणस्वरूपत्वे आधेयस्वरूपत्वे वा परस्परासंभवाद् घटवद्भूतलसत्वेऽपि इदानीं भूतले घटवदिति प्रत्ययप्रसङ्ग इति विस्त
रस्तत्रैव किंच आश्रयत्वं नित्यमेवास्तु उत्पादविनाशव्यवहारस्तु निरूपितताद्युत्पत्त्यादिकमादायैवास्तु वायु
त्वरूपयोस्समवायस्यैकत्वेऽपि रूपनिरूपितत्वाभावेन वायौ रूपवत्ताप्रतीत्यभाववत् किंच लकारस्य यत्नार्थत्वे यव
न्तं चैत्रमस्पेष्यादावपि यत्नमात्रबोधापत्तिः तथा चानन्वयः न हि तत्र यत्नस्याश्रयतासम्बन्धेनान्वयः संभवति नामा
र्थयोरभेद इति नियमात् न च तत्र शत्रादीनां कर्तरि शक्तिः शंक्या स्थानिनामेव व्युत्पत्तिकमतेवाचकत्वात् स्थान्यर्थेन
निराकाङ्क्षतया कर्तरि कृदित्यस्यानुपस्थितेः अन्यथा पच्यमान इत्यत्रापि तदापत्तेः अथ पचन्तमित्यादौ लकारस्य
कर्तरि लक्षणेति चेत्समम् पाकपदादीनां तद्वति लक्षणया पाको देवदत्त इत्यादेरप्यापत्तेः किंच लाक्षणिकानां २

भावकम् लाक्षणिकार्थसंबोधेयदान्तरसमभिहारः कारणमितितार्किकसिद्धान्तात् स्वादिसमभिहारस्सतारशब्दोर्थस्यति
निहेतत्वकल्पनेयवमानःयद्यमानश्चनयोर्वैलक्षण्यानापत्तेः यत्रकिङ्करोतीत्यत्रकिंविषयकोयत्नश्चेत्वेयत्नार्थककरो
तिनाप्रश्नेपचतीत्युत्तरदर्शनादाख्यातस्ययत्नार्थत्वमिति तन्न कृञोयत्नार्थकत्वेयनिबद्धकमेवापत्तेः किंच यत्नमात्रा
र्थत्वेक्रियतेचैत्रः स्वयमेवेत्यादौकर्मवद्भावानापत्तेःयगात्मनेपदापत्तेः कृतिश्चनचैत्रादिनिष्ठा एतेनपचतियाकं करोतिना
विवरणादाख्यातस्ययत्नोर्थइत्यास्तम् उक्तरीत्याकृञोयत्नार्थकत्वाभावात् किंचअचेतनेरथस्सतःकर्तृपदप्रयोगाभा
त्कृभोयत्नार्थत्वमित्येवभवताम्याग्रहः सत्त्वायार्थकः बीजादिनाङ्कुरःकृतोरथोगमनंकरोतीत्यचेतनेपिकृभःप्रयोगात्
अतएवपचतीत्युक्तेकः किंजातीयइतिकर्तृविषयकप्रश्नानुभवःसार्वजनीनः किंचलः कर्मणिचेतिकर्तृशब्दस्यकर्तृ
तयचतयाकर्तृत्वेकृतिरेवेतितद्विरोधपरिहारेपिकर्तृरिक्तदित्यत्रापि कृत्यर्थत्वापत्तेः ततएवकर्तरीत्यस्यानुवृत्तेः शब्दाधिका
राश्रयणेपिक्लेशएव अथतत्रनामार्थयोरभेदइति नियमात् कर्तृत्वाविलमितिचेत् कोदृशोऽत्रनियमः नामार्थयोर
भेदएवेति अभेदोनामार्थयोरेवेति आद्येराज्ञःसुतस्यधनमित्यादौव्यभिचारः द्वितीयेनस्तोकंपचतीत्यत्र ननुनामार्थ
धात्वर्थयोर्नामार्थयोश्चसाक्षाद्भेदान्वयोनेत्येवनियमः राज्ञःसुतस्यधनमित्यादौविभक्त्यर्थसम्बन्धद्वारान्वयोनसाक्षात्
राजपुरुषइत्यत्रतुराजपदस्यराजसम्बन्धिनिलक्षणयाऽभेदएव प्राप्तोदकादावपिउदकपदस्यउदकप्राप्तिकर्मणिल

श्रीः
दुर्गेः
कवाः
सूः
२
3

त्वात् । उपकुंभमित्यादौ कुंभादिपदस्य कुंभादिसमीपादौ धवखदिरावित्यादौ तद्द्वयोरपि प्रधानत्वे परस्परं सम्बन्धाभावादेव न हि पचतिकल्पमित्यादावुक्तगुणस्तिबलादेव कर्त्रा योगस्तु न च तत्र नाम्नः समुदायस्यार्थ एव नास्तीति शंक्यम् पाचकइत्यादावपि तन्मते समुदायार्थविरहात् तस्मान्नामजन्यबोधविशेष्यत्वमेव नामार्थत्वम् किंच कर्तृत्ववाचकत्वे पचति चैत्र इत्यादौ कर्तुरनभिधानात्तृतीयापत्तिः अयमाशयः अनभिहितसंख्याके कर्तरि तृतीया तद्यथा कर्तृकरणयोरेकयोरित्यादौ नामैकवाक्यतया अनभिहिते कर्तृगतैकत्वे इत्यर्थ इति चेदेवं तर्हि पाचको देवदत्त इत्यादौ कृत्तद्धितसमासैश्च संख्याभिधानाभावेनागतेः ननूक्तार्थानामप्रयोग इति न्यायान्नायं दोषः यदि तु कैश्चित्सङ्ख्योच्यते तदनुक्त इत्यादौ सम्बन्धयदर्शनाद्धि वेदं स्ववृत्तमिति न्यायाच्चास्यानवकाश इति उच्यते तदानभिहिते कर्तरि इत्यर्थोऽस्तु अस्ति च पाचक इत्यादावपि विशेषणतया कृतेरभिधानमिति चेन्न तण्डुलः पच्यते स्वयमेवेत्यादौ तण्डुलपदात्तृतीयापत्तेः तत्रापि कृतेरनभिधानात् सिद्धान्ते तु कर्तुरभिहितत्वात्तत्र प्रथमा ननु व्याख्यानस्याश्रयार्थत्वे बीजाभावः देवदत्तादेराधारतया पाकादावन्वसंभवादिति चेन्न नामार्थधात्वर्थयोः साक्षाद्भेदान्वयस्याव्युत्पन्नत्वात् अन्यथा तण्डुलः पचतीत्यपि प्रयोगापत्तेः कर्मत्वसंबन्धेन तण्डुलस्य पाकेऽन्वयसंभवात् किंवा व्याख्यानस्य कर्तृत्ववाचित्वाभावे पचति चैत्र इत्यादावनुभवसिद्धस्य सामानाधिकरण्यस्यानुपपत्तिः ततश्च पचन्ति चैत्र इत्यपि प्रयोगप्रसंगः अस्मन्मते तु अभेदान्वयस्यानुपपत्ता २

न्यायसिद्धे समानवचनकत्वम् अथ चैत्रादिगतसंख्याभिधायित्वमेव चैत्रादिसमानाधिकरणपदमिति चेदेतन्मते संख्या
याः कृत्वाऽर्थत्वे तस्यैव तन्नियामकाभावः अथाहुः भावनान्वयिनि संख्यान्वयः भावनान्वययोग्यत्वेन गृहीतविशेषणीभूतप्रथ-
मान्तपदोपस्थाप्यः चन्द्र इव मुखमिति दृश्यते इत्यत्र इवार्थसादृश्यस्य विशेषणे चन्द्रे संख्यान्वयवारणाय तथाविशेषणेति
भावनायां संख्याकालातिरिक्तप्रत्ययार्थ इति अथ कथं न यवति चैत्र इत्यत्र भावनानन्वयिनि यात्रानुकूलकृत्यभावव-
ति चैत्रे संख्यान्वय इति चेन्न भावनान्वययोग्यताया एव विवक्षितत्वात् अत एव भावनान्वययोग्यत्वमुक्तम् परेतु
परंपरया भावनान्वयित्वमपीवक्तुः अत्रवदंति भावनान्वयिनि संख्यान्वये यथेतत्र लिङ्ग्ये इष्टसाधनताऽन्वितयाके
संख्यान्वयापत्तिः इष्टसाधनत्वातिरिक्ततेन विशेषणे तदेव गौरवम् यथोक्तनियमस्वीकारे लाघवमेव बीजं तथाहि
भावनान्वयबोधायापरपदार्थे चैत्राद्युपस्थितिकल्पनमावश्यकम् तथाच तत्र संख्यान्वयस्वीकारे पदार्थान्तरोपस्थि
तकल्पनप्रयुक्तलाघवमप्रत्यक्षमेवेति चेन्न शाब्दिकमते भावनाया आख्यातवाच्यत्वाभावादाख्यातार्थे आश्रये संख्यान्वय
स्वीकारे पदार्थान्तरानुसंधानेन लाघवात् तथाच संख्याबोधे प्रत्याख्यातजन्याश्रयोपस्थितेर्हेतुत्वं बोध्यम् एतेन यु
ष्मदादिसमानाधिकरणे इत्यस्य युष्मदर्थगतसंख्याभिधायिनोत्पत्त्यर्थोऽ याख्यातः संख्यान्वयस्यानिष्टत्वात् भवतितं भव
तो त्वत्रापि मध्यमापत्तेश्च तेषामेवैतत्कर्मकातिक्रमणकर्त्तृविलक्षणाया युष्मदर्थ एव संख्यान्वयात् इत्यत्र आख्यात

श्री· दुर्गा· व·वा· सू· ४

५

स्थले क्रियाविशेषणकर्मणाद्बोधः तार्किकमते प्रथमान्तविशेष्यकः शाब्दबोधः अत्राहुः वस्तम् गोधावतीत्यत्र प्रथानद
र्शनेन क्रियां प्रति मृगस्य कर्मत्वाद्द्वितीयापत्तिः ननु तार्किकमतेऽपि नायं दोषः वाक्यार्थस्य कर्मत्वादाकाशस्य च प्रातिपदि
कत्वाभावेन द्वितीयायाऽसंभवात् अत एव कैयटादयोऽस्यमेवमादधुः अत एव क्रमादमेनारदः इत्यवोचिस इत्यादौ
वाक्यार्थस्य कर्मत्वान्न द्वितीयेति समादधते यत्तु तत्र निपातेनाभिहितत्वान्न द्वितीयेति तन्न अपि यानेवकृतान्द्धितस
मासैरिति विभाषेयाठादिति चेत्सत्यम् तदेव तु भवन्मतेऽदुर्वचम् तथाहि वैयाकरणानां मते कारकविशिष्टा क्रिया
वाक्यार्थः तत्र च यावतीत्यस्य प्रातिपदिकत्वाभावान्न द्वितीयेति युक्तो ये समाधिः तार्किकमते तु क्रियाविशिष्टप्र
मान्तार्थस्य वाक्यार्थेन यातस्य कर्मत्वाद्द्वितीयाऽदुर्वारैव अन्यथा एवं तत्रैव प्रपेत्यादावपि याकानुकूलकृतिविशि
ष्टस्यैवैत्रस्य कर्मत्वया द्वितीयानापत्तिः अत एव नो लो घटः करोतीति न प्रयोगः न च नीलं करोति घटं करोति इत्यप्र
गेव भाष्यरीत्याकर्मत्वाद्द्वितीयेति वाच्यम् एवमपि विशिष्टस्य कर्मतामादाय पदप्रथमायतेऽदुर्वारत्वात् स्यादेतत् प
प्रयलक्षणायम्या यो वकः यद्मयामिकरं इत्यादौ वकादेः प्रातिपदिकसंभवाद्द्वितीयाऽदुर्वारेति चेन्न तत्राप्यस्यादिक्रि
याप्याहारेणैव बोधात् अत एव पिंडदेवदत्तेत्यादौ पिगादियोगेऽपि न द्वितीयासंबोधने क्रियाया विशेषणमिति सि
द्धा[illegible]स्तमतेऽध्याहृतक्रियाया एव विशेष्यत्वात् अत एव शृणु देवदत्तो गायतीत्यत्र गानादेरेव कर्मत्वम ४

त्वभवसिद्धम् एतेन सुन्नामसमेतन्महात्म्यं तथा बोमनयः सुभाष्यत्तत्र उक्तो विति द्विती यावारणायार्षं ते स्त्रीत्वा र्वेतः पराःस्ताः
तत्राप्यप्याह तायाः सेतो नादि क्रियायायवविशेष्यत्वात् प्रथप्रथमानस्यविशेष्यत्वाभावे स्वरघोनामराजाभत्वमसे
त्तितिमण्डलेतस्यालयतः सम्यगित्यादौ तत्वाहे न स्वर घय रामशर्णा नापतितिशिति वेदेवं तर्हि त्वल्पपरायेस्वभीनुभीनम
न्तो विरेणायत्न् हिमांशुमाशु ग्रसतेतन्त्रादि नमः स्कुरे फलमित्यादौ यत्नक्षेन ग्रसन स्य परामर्शे नायत्निः अत एव भावप्रधा
नमाख्यातमितियास्कवचनमप्युपपद्यते नवाख्यातार्थे शुसंख्याकालादिषु भावनायाः प्राधान्यमिति तदर्थः शंकाः
यत्रोभे भावप्रधाने भवतः इति निरुक्तवचनमयादाय यत्रोभे नामाख्याते भवतस्तत्र भावप्रधाने क्रियाप्रधाने इत्यर्थ इति
तम्भ्रा ष्यव्याख्यायाप्रसंगतेः किंच पठन् गच्छतीति वत् पठति गच्छतीत्यपि प्रयोगापत्ति पाचान् कलकृतिर्मा मैत्रो
गमानुकूलकृतिमानिति वोधसंभवात् प्राहिकमनेन क्रिययोः परस्परमेमन्वयात्वत्त्यप्रयोगः कथं तर्हि यव
तिभवतो न्यत्र याक क्रियाभवति क्रियाया कर्त्रीभवंतीति भाष्यम् अत एव तिङन्तो पस्थापिता क्रियाक्रियान्तरैः
समवायेन गच्छतो तु क्तं भाष्य एवेति विवेचितम् कर्तृकर्मभावेनाक्रिययोः परस्परमन्वयो भवतिनतत्करणतादि
नेति कैयटेन व्याख्यातत्वाम् किंच धात्वर्थव्यापारप्रकारक शाब्दबोधे प्रत्याख्यातजमोयस्थिते स्त्रा किं कमतेहे त्वतयाप्र
रोमवस्कन्दल्लुनोहि नन्दनेषु षाणरत्नानि हरामराङ्गनाः विशेष्यचक्रेन सविद्विषावलीयद्दस्यमस्या स्यमहर्दिवंदि

श्री दुर्गेः व.वा. खं ५

5

वइत्यादौ धुर्य्यैव स्यन्दन इत्यत्र स्वाध्याक्रियेत्यायाकारकान्वयाभावे यात्तसम्बंधे विहितस्य लोगादेरनापत्तेः किंच यात्तसम्बं
धे प्रत्यया इत्यस्य यात्तर्थानां परस्परं सम्बंधे सति यस्मिन्काले प्रत्यया उत्पन्नस्य यात्तर्थानां परस्परं सम्बंधे सति यस्मिन्काले प्रत्य
याउक्तास्ततोन्यत्रापि भवन्तीत्यर्थः वर्तमानसामीप्य इत्यादिना कालवाचकस्यैव प्रक्रान्तता कालएव वाच्यते तत्रापि
गौणत्वात्कर्डपस्याप्यएवन्तिङ्‌यस्याप्यः एवंचवस्यन्ददर्शइत्यत्रवासस्मानकालिकम्भतेदर्शनमितिवाच्यः अत्रा
क्रियाविशेषकवायानुपगमेकर्डपस्याप्यस्यगौणत्वानापत्तेउक्तकालवाचकत्वमपवस्यायाश्रयप्यन्तुयपतिर्वीथ्या अपि
च सहहिषेदभविष्यत्सुभिक्षमभविष्यदित्यादौ क्रिययोः कार्य्यकारणभावेनान्वयाभावे हेतुहेतुमतोर्लृङ् इत्यादेरप्र
वृत्त्यापत्तेरितिदिक् यात्तनां फलव्यापारोभयवाचकत्वेनत्वव्यापारमात्रवाचकत्वम् नचकर्मणिद्वितीयेत्यत्रकर्मपदस्य
कर्मत्वपरतयाकर्मत्वंचफलाश्रयत्वंफलमेवेतिफलंद्वितीयार्थएवेतिनैयायिकानयोक्तेशंक्यम् सकर्मकत्वाकर्मकत्व
विभागानापत्तेः फलव्यापारोभयवाचकत्वेसकर्मकत्वंकेवलव्यापारवाचकत्वमकर्मकत्वमितितैःस्वीकारात् नचयत्नात्
समभिहारे फलंव्यापारश्चप्रतीयतेयात्तः सकर्मकइतितल्लक्षणमस्त्वितिवाच्यम् कर्मप्रयोगेसकर्मकत्वज्ञाने स
कत्वज्ञानेसकर्मकत्वज्ञानेचकर्मप्रयोगइत्यन्योन्याश्रयापत्तेः अर्थापमाशयः संयोगादिरूपफलबोधेगमधात्तसम
भिहारः कारणम् आवश्यकस्यार्थकार्य्यकारणभावः अन्यथागच्छतीत्यत्रविभागात्मकफलव्यापारएवउक्तोतनप्र ५

तीयत्वस्य तत्र नियामकाभावात् इति चेन्न गमधातोस्समभिहारस्य कारणतापेक्षया गमधातोः कारणत्वे एव लाघवात्
अत एव याको गमनमित्यत्र न पर्यायता न च तत्र तत्तत्फलावच्छिन्नव्यापारे लक्षणा तात्पर्यग्राहकं विना लक्षणाया
असम्भवात् स्वरसतश्च तद्बोधोदयेन लक्षणाया अप्रयुक्तत्वाच्च बोधकत्वः स्वीकृतत्वाद्वाचकत्वेनास्तीत्यस्य दुर्वचत्वाच्च
किं च शाब्दबोधे हेतुतावच्छेदकजन्यपदार्थोपस्थितेर्हेतुतया फलविषयकशाब्दबोधं प्रति द्वितीयाजन्योपस्थितेर्हेतुत्वे गौरवम्
न च धातुजन्यफलोपस्थितेर्हेतुत्वं कल्प्यमिति साम्ये शंक्यम् फलविशेषबोधे धातुविषयसमभि हारस्य नियामकत्वे
न तद्दोषसाम्यात् अर्थाश्रयमात्रे द्वितीयार्थ इति मते द्वितीयाजन्याश्रयोपस्थितेर्हेतुत्वकल्पने साम्यमिति चेन्न ग्रामम
याति इत्यविशेषेण इत्यादिप्रयोगानुरोधेनाश्रयबोधे प्रति तद्धेतुत्वस्य भवतोऽप्यावश्यकत्वात् किं च व्यापारमात्रस्य धात्वर्थत्वे
पच्यते तण्डुलः स्वयमेवेत्यादौ कर्मवद्भावानापत्तिः न च धात्वर्थजन्यफलाश्रयत्वमेव कर्मवद्भावविषय इति वाच्यम् पच्यते
घटः स्वयमेवेत्यस्याप्यापत्तेः धात्वर्थयत्नजन्योत्पत्तिरूपफलस्य घटे सत्त्वात् अन्यथा क्रियते घटः स्वयमेवेत्यस्यानापत्तेः
क्रिया च व्यापारसमुदायः तदुक्तं हरिणा यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते आश्रितक्रमरूपत्वात्सा क्रियेत्यभि
धीयते॰ इति एतेन धात्वर्थक्रियातद्वाचकत्वं च धातुत्वमित्यतो नाश्रयोऽपास्तः साध्यत्वं च क्रियान्तराकाङ्क्षानुत्था
पकतावच्छेदकत्वेन देवासत्त्वभूतत्वेन देवाभिप्रेतमुक्तं हरिणा असत्त्वभूतो भावश्च तिङ्पदैरभिधीयत इति व्याराण

श्री॰ मवेतत्तेपितद्दादिम्मायेनतद्धिविशेषादेरेवशक्ततावच्छेदकानांनियामकत्वात् लकारविशेषाणांलगादीनांतुवर्तमानत्वादि
दुर्गे॰ कमप्यर्थः वर्तमानत्वंचप्रारब्धापरिसमाप्तक्रियोपलक्षितत्वम् वर्तमानत्वादीनांतुयातथ्यंव्यापारेएवान्वयः तत्तत्सत्त्व
व॰ वा॰ पचतीत्यादिप्रयोगात् तार्किकास्तुफलएववर्तमानत्वादीनामन्वयः यत्नाभावेऽग्निसंयोगादिरूपव्यापारसत्त्वेप्ययंनप
सु॰ चतीतिप्रयोगात् वस्तुतस्तुफलस्यापिव्यापारविशेषणत्वाददोषः किंचजानातीत्यादौव्यापारएवतेषांवर्तमानत्वादीनाम
९ न्वयः नष्टेनश्यतीतिप्रयोगवारणायोत्पत्तेरप्याख्यातार्थत्वस्वीकृत्यतत्रैववर्तमानत्वादीनामन्वयइतिदीधितिकृतापि॰
6 स्वीकारादेनेककार्यकारणभावप्रसङ्गः नचव्यापारेतदन्वयेनाशस्यवर्तमानत्वान्नष्टेपिघटेनश्यतीतिप्रयोगापत्तेरिति
वाच्यम् नाशसामग्रीसमवधानस्यैवतत्रव्यापारत्वात् तत्रेदंवर्तमानत्वादिलकारत्वेनैववाच्यंवेतियत्तद्द्वयमपिक्षोदक्षम॰
मेवंकालस्यक्रियाद्वयतयाक्रियामात्रस्यचयानवाच्यत्वात् लकारोद्योतकएव अथवाक्रियागतेवर्तमानत्वादिलका
रवाच्यमेवेत्यन्यत्रविस्तरः परोक्षत्वमतीतत्वमनद्यतनत्वंचलिटोऽर्थः परोक्षत्वंचवक्तृसाक्षात्कारविषयत्वंव्यातेनेकि
रणावलीमुदयनइतिवत्सक्रममेव चक्रेसवेधुःसुजनेकवेधुरित्यपि यत्नाणत्रुनमोवेतिन्यायकाकर्तृपरोक्षत्वेपिलिड्
भवतीतितत्र चित्तविक्षेपायाःप्रमत्ताभावेउत्तमप्रयोगात् यथावङ्गजगदुरस्त्वानसमत्ताकिलाहमितिं यमुक्ते
वर्धमानेनतिङ्. त्वाप्रतिरूपकोयंनिपातइतितन्त्रिरूपम् तथाप्रतियात्त येतावच्छेदकफलाश्रयत्वाभावेनकिरणा ९

वलोमित्यस्य कर्मत्वानापत्तेः अस्याख्यानार्थो निर्णयः समासस्थले विशिष्टस्यैवार्थवत्वं घटादिपदे घकारादीनामिव तत्रत्यावयवा
नां निरर्थकत्वादिति शाब्दिकाः तार्किकास्त्ववयवशक्त्यैव निर्वाहमिच्छन्ति तन्मते समासे वृत्तिमत्त्वस्यार्थवत्वाभावात्प्राति
पदिकत्वानापत्तिः अवयवार्थमादाय समुदायस्यार्थवत्वं तत्तु न संभवति एवमपि समुदायस्य शक्तिलक्षणयोरसंभवात् अ
र्थवत्वं सूत्रस्वरसेन निमितमेव अन्यथागतिविरहमाह स्यादावपि प्रातिपदिकत्वापत्तेः ऽ सिद्धान्ते त्वर्थकरणयोरभेदविवक्षा
यां स्यादशाङ्को शब्दादीनामुपस्थापकत्वेपि हसोयस्थापकत्वाभावान्नार्थवत्त्वम् न च तत्र समासग्रहणात्प्रातिपदिकत्वे तथा
सति समासग्रहणस्य नियमार्थत्वाभावे वाक्यस्यापि प्रातिपदिकत्वापत्तेः सर्वसमगायत्तेः मूलकेनोपदंशमित्यादौ कृद्ग्रहण
परिभाषया प्रातिपदिकत्वापत्तेश्च राजपुरुष इत्यादौ नामार्थयोरिति नियमाद्राजाभिन्नः पुरुष इति बोधापत्तिश्च राज
पदस्य राजसंबंधिनि लक्षणया राजसंबंध्यभिन्नः पुरुष इति बोधाभ्युपगमे तु राज्ञो दासी इत्यत्र समानाधिकरणलक्षणपुंव
द्भावापत्तिः इष्टेः भार्या यत्र सामानाधिकरण्यं तत्रैव पुंवद्भाव इत्युक्तौ मृगी चपला मृग चपलेत्यादावपि पुंवद्भावानापत्तेः
अत्र हि सदृशलक्षणया सामानाधिकरण्यम् एवं चित्रगुरित्यादावपि चित्राभिन्ना गौरिति बोधवारणाय गोःपदस्य चित्रगवी
स्वामिनि लक्षणा चित्रपदं तात्पर्यग्राहकमिति सिद्धान्तः सोप्यसंगतः समानाधिकरणलक्षणपुंवद्भावानापत्तेः अनेकपद
स्यैकस्मिन्नर्थे वर्तमानत्वाभावात् देवदत्तं पण्डितं जानीहीत्यादाविव देवदत्त पण्डितं जानीहीत्यादावपि पाण्डित्यस्य विधेयत्वाय

श्री: दु.गौ. व.वा. रह. ७

7

नेष्ट अतएव यदहं ब्रवीमित्यत्रास्मदो द्वयोश्चेत्यनेनप्राप्तस्य बहुवचनस्य सविशेषणस्येत्यनेन प्रतिषेधो भवति वयं ब्राह्म
णा इत्यत्र तु ब्राह्मणत्वस्य विधेयत्वेन विशेषणत्वाभावान्न निषेध किंच अवयवानामर्थवत्त्वे अस्मदादेः पुरुषत्वादा
विव अर्थस्य राजपुरुष इत्यपि विशेषणयोगाद्यत्नैः नवयत्र समासघटकीभूतपदवहिर्भूतपदसापेक्षत्वमभेदेन स
मासोऽसाधुः अतएव शरैः शातितपत्रोऽयमित्यादौ न दोष इति वाच्यम् पतदवनारम्भस्यैव गुरुत्वात् ममत्वसापेक्ष
मसमर्थवदिति नवावतिके किंतु पदार्थैकदेशत्वान्न ऋद्धादीनामन्वय इत्यभिप्रायकं देवदत्तस्य गुरुकुलमित्यादौ च
लोके वा योदयेन तुल्यस्य वृत्तिरिति असमर्थमित्यस्य हि लोके वा योजनकमित्यर्थः अथ तार्किकमतेऽपि राजपद
स्य राजसंबंधिनि लक्षणाभ्युपगमेनैकदेशत्वान्न ऋद्धादीनामन्वय इति चेन्न कण्ठेकालः दासीपुत्र इत्यादौ लक्षणा
यां मानाभावेन तत्र विशेषणान्वयापत्ते किंच यस्य राजपुरुष इत्यत्र लक्षणपक्षस्तु तेषामनाक्षाद्वीय लक्ष्यस्य पुरुषस्य
तादृशप्रयोगापत्तेर्दुर्वारत्वात् नहि तत्र पक्षेनान्वयः संपेपेति राजशासनमस्ति अपि च हस्तेरर्थवत्त्वाभावे पुरुषो व्याघ्र इ
व शूर इत्यादाविव पुरुषव्याघ्रः शूर इत्यस्य तुल्यार्थतापत्तौ उपमितं व्याघ्रादिभिरित्यत्र सामान्याप्रयोग इति निषेधात्समाना
पत्तिः सिद्धान्ते उपात्तधर्मातिरिक्तधर्मेण साकाङ्क्षस्य ग्रहणे समासो भवत्येव अतएव भाष्याब्धिः कान्तिगंभीर इत्यत्र विततं
उदवगाहत्वादिना सादृश्यम् अतएव वषट्कर्तुः प्रथमभक्ष इत्यत्र भक्षणमुद्दिश्य न प्राथम्यविधिरिति मीमांसकसि ७

द्धान्तः अत एव चेह शास्त्रे समासे सन्ति अविमृष्टविधेयतादोषाय नितिरित्यालंकारिकाः एवं राज्ञः पुरुषः स्मरश्च भवतीति वा
केय राजसंबंधेप्सुरतो भयस्य पुरुषे बोधवद्राजपुरुषप्सूरश्चेत्यपि प्रयोगापत्तेः किंच राजपुरुष इत्यादौ षष्ठ्यादिलोपे याणि
याद मित्यादौ वादिलोपे च वचनारम्भे गौरवात् तस्मात् पङ्कजादिपदवत्समासे शक्तिकल्पनमुचितम् अथ राजपुरुषादेः
समुदायस्य शक्तत्वे निषादस्थपतियाजयेदित्यत्र निषादानां स्थपतिरिति न तत्पुरुषः पूर्वपदे संबंधिनि लक्षणाप्रसंगात्
किंतु कर्मधारयो लाघवादिति सिद्धान्तासंगतिरिति चेन्न तत्पुरुषे संबंध्यादिरूपाधिकपदार्थोन्तर्भावेणैकार्थीभावकल्प
नीय इति तत्पुरुषापेक्षया तस्य जघन्यत्वम् नञ्समासेनारोपितत्वस्य नञा द्योतनाद ब्राह्मण इत्यस्यारोपितब्राह्मण इत्यर्थः
ब्राह्मणभिन्न इत्यादिस्तार्थिकोर्थः अत एवोत्सर्गिकं तत्पुरुषस्योत्तरपदार्थप्राधान्यमपि सिध्यतीत्य सर्वस्मै इत्यादौ स
र्वनामत्वात्स्मापादयः ननु शाब्दिकमते नञो द्योतकत्वाद ब्राह्मण इत्यादावेकार्थीभावासंभवः भिन्नार्थानां शब्दानामेकार्थ्यहति
तस्यैवैकार्थीभावपदार्थत्वादिति चेन्न ब्राह्मणत्वमारोपश्च ब्राह्मणशब्दार्थः तयोश्च परस्परं विषयविभावेनान्वयः आरोपविषयः
ब्राह्मणत्ववानिति इदमेव नञो द्योतकत्वम् एवं च तादृशपदार्थयोः परस्परमन्वयमात्रेणैकार्थीभावव्यवहारात् भाष्या
नुसारिणस्तु नञो भावपदार्थस्य च प्रतियोगिनि विशेषणं विशेष्यं वेति पक्षद्वयम् आद्ये घटो नास्तीत्यत्राभावप्रतियो
गि घटकर्तृकास्तितेति बोधः अतेभवसीत्यत्र भेदप्रतियोगित्वद्भिन्नाश्रयिकाभवनक्रियेति बोध इति युष्मदर्थसामानाधिक

श्रीः
दुर्गाः
कृ॰वा॰
सं॰ ८

रणेषु सत्वात्मत्वमादिपदवत्स्यात्सिध्यति तन्मध्ये तत्तद्वसिद्धिः एवं च बहुव्रीहौ वचनेन लोके त्वं च बहुवचनमपि सिध्यति अभावयस्त्वेनानतसे
कत्वानन्दनायत्तिः एवं सर्वैः नेकयासन्ततायाः यानेकममपदार्थत्वेऽनेकपदार्थप्रधानत्वादेकवचने सिध्यति एतेनानेके
जलपेविवोभयस्त्यत्रत अनेकशाहस्रैकशेषेणवोयः द्वितीयेन अभावविशेष्यकएववोयः उत्तरपदकार्येतत्र नञ्समासः
इति न्यायकादितस्मत्रविस्तरः इति समासार्थनिर्णयः उपसर्गाणां द्योतकत्वमेव न वाचकत्वम् अनुभूयते स्वत्वमित्यत्र यथा
तथ्येतावच्छेदकफलशालित्वाभावेन कर्मणि लकारानापत्तेः एवं चादीनामपि द्योतकत्वम् अतएव साक्षात्क्रियते हरि
रित्यादौ हरेः साक्षात्कारकर्मता एतेन प्रादीनां द्योतकत्वे चादीनां वाचकत्वमित्यर्द्धजरतीयमयास्तम् ननु चादीनां वा
चकत्वाभावे स्वीकारार्थकादौ मितिपदार्थस्य हवोधानापत्तिरिति चेन्न निपातानामेव द्योतकत्वेनाव्ययान्तरस्य द्योतक
त्वाभावात् ननु लौकिकविषयत्वे निपातार्थः करोतेश्च तदनुकूलो व्यापारोऽर्थः तथा च यामगच्छतीत्यत्र द्विती
यार्थफलाश्रयत्वेनैव साक्षात्क्रियते हरिरित्यत्रापि करोत्यर्थजन्यनिपातार्थफलाश्रयत्वादेव कर्मत्वमास्तीति चेन्न
केवलव्यापारवाचकत्वस्य पूर्वमेव निराकृतत्वात् किंच निपातानां वाचकत्वे शोभनः समुच्चयोऽस्य इति वच्छोभन
श्चेद्वत्वस्य इत्यपि प्रयोगापत्तिः घटस्य समुच्चय इतिवत् घटस्य च इति प्रयोगापत्तिश्च ननु शोभनः समुच्चय इत्यादौ
नामार्थयोरभेदएव शोभनश्चेत्यादौ तु निपातार्थनाम्नोः शोभनत्वम् समुच्चय इति भेदएव निपातातिरिक्तनामार्थयोरेवा ८

भेदस्वीकारादिति चेन्न निपातातिरिक्तनामार्थयोरेवाभेदस्वीकारादिति चेन्न, निपातातिरिक्तत्वविशेषणप्रवेशस्यै
वगुरुत्वात् अपि च शरैरुस्तैरिवोदीच्यानुद्धरिष्यन् रसानिवेत्यादावनन्वयः अत्र उस्तसदृशैः शरैः रसमसदृशानुदीच्यानु
द्धरिष्यन्नित्यर्थः स च उस्तादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्वेन संगच्छते तथाहि उस्तैरिति करणतृती
या न चोस्तात्रकरणमिवशब्दार्थसदृशस्य करणत्वात् ननु तत्र क्रियायामाहत्य उस्तकरणकरसकर्मकोद्धरणसदृश
शरकरणकोदीच्यकर्मकोद्धरणमित्यर्थोऽत्र दोष इति वाच्यम् वारद्वयमिवशब्दप्रयोगासंगतेः उपसर्गत्वात्त्यपा
निपातत्वस्याधिकहतित्वात् इवशब्दे द्योतकतायाः कल्पयितुमुचितत्वाच्च सामान्यप्रमाणानोपलब्धत्वात् निं
पातत्वे वा त्वदुपायापि रूपे जातिरूपं वा उभयथापि प्रादिचादिसाधारणमेव ननु तत्पुरुषे उत्तरपदार्थप्राधान्यमिति प्र
वादस्य अर्थवद्योत्यांशप्रतिप्राधान्यमित्याशयः द्योत्यार्थे वत्वात्यानियदिकत्वमपि इति वाक्यार्थनिरूपणम् जातिरेव शब्दा
र्थ इति मीमांसकाः तथाहि व्यक्तौ नामानंत्यादेकव्यक्तौ शक्तिग्रहे व्यक्त्यन्तराबोधाच्च न व्यक्तौ शक्तिसंभवः जातिविशिष्टा
यां व्यक्तौ शक्तिरित्यक्तौ तु नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामतीति न्यायादावश्यकत्वाच्च जातावेव शक्ति
रस्तु व्यक्तिबोधस्त्वाक्षेपात् न चाक्षेपितव्यक्तेः पदार्थत्वाभावाद्गामानयेत्यादौ व्यक्तौ कर्मत्वाद्यन्वयः न स्यात् सर्वपदानां
कृत्यर्थान्वितस्वार्थबोधकत्वादिति वाच्यम् लक्षणया तस्याप्युपस्थितत्वात् लक्षणैव ह्यत्राक्षेपशब्दार्थः न चा

श्री॰
दुर्गा॰
व॰वा॰
स॰
५
९

नुपपत्तिप्रतिसंधानं विना कथं लक्षणेति वाच्यम् निरूढलक्षणायां तदनपेक्षणात् ननु स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणेति नियमात्कथं घटते नोपस्थिते लक्षणेति चेन्न एतन्नियमे मानाभावात् अत एव नीलं घटमानयेत्यादौ नीलरूपवति लक्षणेत्याहुः नैयायिकास्तु जात्याकृतिव्यक्तयः पदार्थ इत्याहुः अत्र यद्यपि एकं द्विकं त्रिकं वाथेत्यादिना बहवः पदार्थास्तत्संमतास्तथापि केवलव्यक्तिरेव पदार्थ इति पक्षोन्यायात् शक्तिग्राहकशिरोमणेर्व्यवहारस्य तत्रैव पक्षपातात् ननु व्यक्तीनामेव शक्यार्थत्वे आनन्त्यादिति प्रागुक्तो दोष इति चेन्न जातेरुपलक्षणत्वस्वीकारात् तदुक्तं भट्टपादैः आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् शब्दः सुकरसंबन्धो न च व्यभिचरिष्यति अत्र वदंति व्यक्तीनामानन्त्याद्गोत्वादिविशिष्टव्यक्तौ शक्तिकल्पने गोत्वादौ शक्यतावच्छेदकत्वकल्पनस्यावश्यकतया व्यक्तिकल्पने प्रयोजनविरहः यथा हि गोत्वं शक्यतावच्छेदकतानिरवच्छिन्नं तथास्मन्मते शक्तिरपि निरवच्छिन्नेति न गोत्वत्वप्रवेशगौरवम् अथ जातिशक्तिवादिमतेऽपि गौर्नष्टेत्यादौ व्यक्तिभानस्यावश्यकतया शक्तिर्दुर्वारेति चेन्न व्यक्तिशक्तिज्ञानं विना शाब्दबोधे हेतुत्वानस्वीक्रियत इत्येतावतैव व्यक्तेरवाच्यत्वव्यवहारात् अत एव कंशेदकज्याशक्तिरिति प्रवादः अत एव संसर्गेण शाब्दबोधविषयत्वेऽपि न वाच्यता एवं गौर्गोपदशक्य इति व्यवहारोऽपि न विरुध्यते अत्र केचित् घटपदाद्घटत्वादिरूपेणोपस्थितिर्न तु द्रव्यत्वादिरूपेणेति वैषम्यानुपपत्तिः घटे घटत्वस्येव द्रव्यत्वादेरपि वैशिष्ट्ये विशेषाभावात् तस्मादत्र

टत्वविशिष्टएवशक्तिरूपेया घटत्वविशिष्टस्यस्वघटघटत्वयोरितिवार्थः घटत्वस्योपलक्षणत्वेउक्तदोषानवकाशात् अ
त्रेदंतत्त्वम् लक्ष्यस्यलक्ष्यतावच्छेदकत्ववत् प्रकारणस्यस्वप्रकारणतावच्छेदकत्ववत् अशक्यस्यशक्यतावच्छेदकत्वेवा
धकाभावाद्घटत्वादिकमुपलक्षणम् अतएवदीधितौशक्यतावच्छेदकेशक्तिर्दर्शितेवेत्यलम् विशेषणविभक्तेरभेदार्थत्व
मित्येकेसाधुत्वार्थकत्वमित्यन्ये अत्रेदंबोध्यम् नीलंघटंकरोतीत्यादौघटपदोत्तरद्वितीयायाकर्मत्वस्याभिहितत्वान्नीलपदो
त्तरद्वितीयानप्राप्तेत्याशंक्यनीलंकरोतिघटंकरोतीतिशिष्टगेवान्वयः पश्चान्मानसोनीलघटयोरभेदावगमइतिसमाहि
तम् निरुक्तद्वितेतिपरिगणनेनत्वनाश्रयणीयमित्याशयः यदाधावितमण्डनन्यायेनैकस्मिन्नेवकर्मणिघटपदादिवनी
लपदादपिद्वितीयेतिपदस्थलेसाधुत्वार्थकत्वप्रवादः अतएवोक्तंभाष्येअथवाकटएवकर्मतत्समानाधिकरणाभी
ष्मादिभ्योपिद्वितीयेतिविशेष्यसमानविभक्तिकत्वेविशेषणस्यसाध्यमितिभावः तद्यथा ईश्वरस्तुरुद्रः स्वयंनिर्द्देनाञ
पितद्ध्नेनधनफलभाजस्तद्वत् भाष्येत्वपदान्तरमप्युक्तम् अथवाकटोपिकर्मभीष्मादयोपीति कटपदोत्तरद्विती
ययाकटगतकर्मत्वस्योक्तावपिभीष्मगतकर्मत्वबोधनायभीष्मपदोत्तरद्वितीयावश्यकीति अस्मिन्पक्षेभीष्मरूपकर्मा
भिन्नंकटरूपकर्मेत्यर्थः एवंचविशेषणविभक्तेरभेदेहतिकल्पनेमूलम् पदार्थभेदेद्वन्द्वः पदार्थतावच्छेदकभेदेकर्म
धारयइतितार्किकादीनांप्रवादः अत्रपदार्थत्वंपदजन्यप्रतीतिविषयत्वंतच्चपदार्थतावच्छेदकसाधारणंतत्रापिप्रकारता

श्री॰
द्वंद्वः
व॰ वा॰
सु॰
१०
10

रूपविषयतासत्त्वात् एवं च नीलघटयोरभेद इत्यादौ पदार्थतावच्छेदकयोर्भेदादेव द्वंद्वः अयमेव प्रमाणप्रमेयप्रयोजनेत्यादि
गौतमसूत्रेऽपि प्रमाणप्रमेययोर्भेदाभावेऽपि पदार्थतावच्छेदकयोः प्रमाणत्वप्रमेयत्वयोर्भेदादेव द्वंद्वः अत एव द्वंद्वापवाद एक
शेष इति प्रवादविशेषः घटा इत्यादौ पदार्थतावच्छेदकस्यापि भेदाभावेन द्वंद्वाप्राप्त्या अपवादत्वासंभवात् यत्तु केऽजगदीशे
न घटा इत्यादौ व्यक्तिभेदसत्त्वात् द्वंद्वप्राप्त्युपपादनेन घटकलशावित्यत्र पदवाच्यभेदसत्त्वात् द्वंद्वापत्तेः न हि तत्रैकशेषः
संभवति विरूपत्वादिति तदशुद्धम् विरूपाणामपि समानार्थानामिति वार्त्तिकेन तत्राप्येकशेषस्य दुर्वारत्वात् यत्तु ता
र्किकैकदेशिनः एकशेषः कृतद्वंद्वानामेवान्यथा श्रूयमाणपदोत्तरमेकवचनश्रवणप्रसंगादिति तन्न कृतद्वंद्वा
नामेकशेषे करीकरा इत्यत्र द्वंद्वश्च प्राणितूर्यसेनाङ्गानामित्येकवद्भावापत्तेः यदपि प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबो
धकत्वन्यायादुद्भिदादेरनन्वय इति तदपि न शिष्यमाणे स्वप्रधानार्थाभिधायीति न्यायेन तस्यापि प्रकृत्यर्थत्वात् इ
तिवेदचाहुः पदार्थशाब्दः पदजन्यप्रतीतिविषयपरः घटे विशेष्यता घटत्वे च प्रकारता न्यायसेति घटा इत्यादौ व्यक्तिभेदेन
नीलघटयोरभेद इत्यादौ च नीलत्वघटत्वयोर्भेदेन पदार्थभेदसत्त्वात् यत्र पदार्थतावच्छेदकभेद एव द्वंद्वः एकशेषोऽपि
हरय इत्यादावेव अयं वादत्व प्रवादोऽपि तत्रैव द्वंद्वप्राप्त्या तत्राप्येकशेषस्यावश्यकत्वात्, तन्न घटोऽयं घटोऽयमिति प्रयो
गवत् व्यक्तिमात्रविवक्षायां घटघटावित्यस्यापि प्राप्त्या तत्राप्येकशेषस्यावश्यकत्वात् एतेनाशिष्य एवैकशेषः १०

एकघटशब्दादेववृत्ववत्वेनानेकघटबोधसंभवात् सकृदुच्चरितः सकृदर्थं गमयतीति न्यायस्याप्रामाणिकत्वात् हरः
यश्चाद्यावपि सति तात्पर्य्ये युगपदनेकबोधे इष्टापत्तिरेवेति पर्यास्तम् हरिहरावित्यादिद्वंद्ववारणायैकशेषस्यावश्यक
त्वात् किंच पदार्थतावच्छेदकभेदस्यैव नियामकत्वे एकस्मिन्नपि प्रसिद्धपिण्डे कुण्डलिनौ गावृत्त इति प्रयोगापत्तिः पदार्थ
तावच्छेदकस्य दण्डकुण्डलादेर्भेदसत्त्वात् न चाहितानन्वयः शंक्यः नीलघटयोरभेद इत्यादाविव पदार्थतावच्छेदकैक
देऽन्वयसंभवात् दीधितिकृदनुयायिनस्तु एकपदार्थे परपदार्थाभेदतात्पर्यकसमासत्वं कर्मधारयत्वं भेदतात्पर्यक
त्वे द्वंद्वत्वमित्याहुः शाब्दिकमते तु शब्दस्वरूपस्यापि शाब्दबोधे विशेषणतया भानान्नीलघटयोरित्यत्र नीलपदोपस्था
प्यघटयोरित्यर्थः तत्र विशेषणीभूतशब्दस्वरूपभेदात्पदार्थभेदादेव द्वंद्वः अतएव वासवादैत्यदैतेयेत्यत्र दनुजेज्याविदान
वा इत्यत्र विरूपाणामपि समानार्थानामित्येकशेषो न भवति समानप्रवृत्तिनिमित्तकस्यैव समानार्थत्वात् स च शब्दस्वरूप
स्यैव प्रवृत्तिनिमित्तत्वात् एवं चेंद्रपदवदग्निन्द्रामरूपत्वसद्वानितिबोध्यः किंच शब्दविवक्षासत्वासत्वाभ्यामपि द्वंद्वकर्मधा
रयोर्भेदः पचकोशायदमेव पदार्थ इति तन्न नामार्थयोरभेद इति न्यायविरोधापत्तेः ध्वनीनां सर्वेषामनित्यत्वात्तदभिव्यं
ग्यः स्फोट एवार्थवानिति सिद्धांतः तार्किकास्तु श्रूयमाणपदानामेव वाचकत्वमिच्छन्ति ननु एकैकवर्णानां वाचकत्वे
घकारमात्रश्रवणेऽपि घटबोधापत्तिः समुदायस्तु तेषामसंभवी वर्णानामाशुविनाशित्वादिति चेन्न तन्नद्वर्णानुभवज

श्री॰ दुर्गे॰ व॰वा॰ म॰ ११

नितसंस्कारैस्तावद्वर्णगोचरायाः समूहालम्बनात्मिकैकस्मृतेः स्वीकारात् अत्रेदं विचिन्तनीयम् चरमवर्णानुभवकाले तत्रा
ग्भानेन तदेवाग्रे सर्ववर्णस्मरणं कल्प्यते नाद्यः ज्ञानद्वययौगपद्यस्य तैरस्वीकारात् न द्वितीयः उद्बोधकाभावात् ननु पू
र्ववर्णानुभवजनितसंस्कारसहितचरमवर्णानुभव एव तावद्वर्णस्मरणे हेतुरिति चेन्न संस्कारानुभवस्मरणानां समानवि
षयकत्वेन कार्यकारणभावाभावात् एतेन तावद्वर्णसंस्कारैः समूहालम्बनात्मकमेकं स्मरणं मन्तव्यमेतेदपास्तम् किंच
समूहालम्बनस्वीकारे चकारटकारयोः कटस्यानाटमित्यस्य वैलक्षण्यापनायत्तिः सरोरसइत्यनयोर्वैलक्षण्यापनायते
श्च नह्येकस्मरणविषयाणां वर्णानां पौर्वापर्यसंभवः अथ येन क्रमेणानुभूतास्तेनैव क्रमेण स्मर्यन्ते ततः शाब्दबोधं जनय
न्तीति चेन्न क्रमेणानुभूतानामपि व्युत्क्रमेण श्लोकादौ स्मरणदर्शनात् एतद्वर्णानां प्रत्येकं स्फोटव्यञ्जकत्वं मिलितानां वेति
शाब्दिकमतेऽपि प्रागुक्तविकल्पदोषा इति तन्न चकारादि त्रिवर्णैरवयवव्यञ्जनद्वारा समुदायाभिव्यक्तेः यद्यपि गृहीतसंके
तानां वर्णानां स्फोटव्यञ्जकत्वमगृहीतसंकेतानां वा ॥ आद्ये तैरेव सिद्धौ किं तेन द्वितीये सर्वस्याप्यर्थबोधापत्तिरिति तद्यपि न
अगृहीतसंकेतैरव्यञ्जनात् अत एवागृहीतार्थकेऽप्येकं पदमिति व्यवहारः तस्मात् समूहालम्बनात्मकपदमिदमनु
भवसाक्षिकमानुपूर्वीविशेषविशिष्टकाश्चिद् वर्णपंक्ताः पदार्थाः लोकार्थं स एव शाब्दिकानां स्फोटः अत एव चरादी
नामतिरिक्तत्वेन तज्जसदेवपुष्पात्मकत्वेन विशाकलितेषु तेष्वपि घट इति बुद्ध्यायते रिति वैशेषिकाः एतदेकं पदमिति त्वनुभवाः ११

र्थैकत्वनिर्वचनमिति नन्व अर्थबोधाभावेपि यदत्वग्रहात् तदेवेदं पदमिति बुद्धेस्तज्जातीयविषयकत्वेन तज्जातीयं पदमिति व्य
वहारायत्तेश्च किं च हर हव विष्णोऽवेत्यादौ एकादेशोक्ततेः पदविभागासंभवेन समुदायशक्तिरावश्यकी किं चोच्चारणभे
दाभिन्नेषु व्यक्तिनानात्वे आनन्त्यादिदोषात् अपि च आनुपूर्वीविशेषविशिष्टस्यैव पदत्वेन समूहालम्बने पदत्वानुभवोऽ
ध्येटः यत्र पूर्ववर्णध्वंसविशिष्टस्यैव पदत्वेन समूहालम्बने पदत्वानुभवोऽर्थेटः यत्र पूर्ववर्णध्वंसविशिष्टचरमवर्णानुभवप
वानुपूर्वीति तन्न यत्र चकारमुच्चार्य्य प्रहारानन्तरं टकारमुच्चारितवांस्तत्रापि पूर्ववर्णध्वंससत्त्वेनातिव्याप्तेश्च व्यवहितोच्चारतत्त
गानादिभेदेनानुगतम् किंच । लोकादौ पदविभागे क्रियमाणे शाब्दबोधस्यानुभवसिद्धस्यापलापापत्तिः वर्णानां
पौर्वापर्यस्य पदविभागात्पागेवोच्चरत्रापि समत्वात् अपिच अघटमानय देवदत्तेत्यादौ यदि प्रथमक्षणे घटपदस्मरणं द्वि
तीयादिक्षणे आनयादिस्मरणं तदा तृतीयादिक्षणे पूर्वस्मरणस्य नाशाच्छाब्दबोधानुपपत्तिस्तद्वदस्यैव अतोऽनुगतं तेषां
स्मरणमित्यभ्युपेयम् तदुक्तं हरिणा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति तथैव सर्वे युगपत्पदार्थाः परस्परे
णान्वयिनो भवन्तीति एवं च गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादावपि समूहालम्बने पदार्थानां विषयताविशेषात् अज्ञा
सत्वभावाच्छाब्दबोधाभाव इति ता किं कथं वाद विरोध इत्यलम् तेव स्फोटाष्टौ हृपः स्मृय इत्यादौ वर्णभेदेनार्थभेदाद्वर्णा
अपि वाचका इति वर्णस्फोटः यद्वाक्यस्फोटौ तत्कावेव यदादौ वर्णद्वयोन्मत्तत्वात् व्यपदेश यद्वाक्यस्फोटः वर्णपदवा

श्री॰ दुर्गा॰ व॰वा॰ स्तु॰ १२

12

कागताजातिरेववाचिकेतिवर्णपदवाक्यजातिस्फोटः अत्रेदंतत्वम् परापश्यंतीमध्यमावैखरीतिचतुर्विधावाक् तथाहि भग
वतोजगत्सिसृक्षयामायाशुक्रपावाविर्भवतः तत्रत्रिगुणपदव्यक्तेतस्माद्धिंदुरूपाच्छब्दब्रह्मनामधेयंवर्णादिविशेषरहितेनादमा
त्रमस्तपयतेतदेवजगदुपादानेपरावागित्युच्यते विंदुस्वरूपाज्जगतोव्यंजनात् तदुक्तंभारते क्रियाशक्तिप्रधानायाशब्दशब्दा॰
र्थकारणम् प्रकृतेर्विंदुरूपिण्याःशब्दब्रह्माभवत्परं स्वरूपज्योतिरेवांतः परावागनपायिनी तस्यांदृष्टस्वरूपायामधिका
रोनिवर्ततइति श्रोत्रविषयावैखरीहृदयदेशस्थामध्यमाः पश्यंतीतुलोकव्यवहारातीतायोगिनांतस्तित्रापिप्रकृतिप्रत्यय
विभागः तदुक्तंभारते प्राणवृत्तिमनुक्रम्यमध्यमावाक्प्रवर्तते प्राणवृत्तिमनुक्रम्यप्राणवायुव्यापारमाश्रित्य अविभागा
नुपश्यंतीसर्वतःसंहृतक्रमास्थानेषुविहितेवायौकृतवर्णपरिग्रहावैखरीवाक्प्रयोक्तृणांप्राणवृत्तिनिबंधिनीतिप्राणव्यवा
स्थानाभिघातद्वाराशब्दितेननिवर्ततइत्यर्थः हरिरप्याह वैखर्यांमध्यमायाश्चपश्यंत्याश्चैतदद्भुतम् अनेकतीर्थभेदायाः
त्रय्यावाचःपरम्पदमिति अनेकतीर्थभेदायाःत्रय्यावाचःपरम्पदमिति अनेकतीर्थभेदायाःनामाख्यातादिभेदभिन्नायाःपरा
यांयोगिनामपिप्रकृतिप्रत्ययविभागोनास्तीतित्रय्याइत्युक्तम् तथावहरिर्वैशेष्ये अन्तरालप्रकारस्यस्फोटस्यवर्णसे
ध्यइतिस्फुटत्यर्थोऽस्मादितिस्फोटःनित्यःशब्दः अतएवाक्षरशब्दस्यब्रह्मवाचकस्यस्मारकस्याशुद्धिपूर्वप्रयोगः साहृश्यवा
नित्यत्वेनैवतत्रनित्यत्वेव्यवहारनित्यायेत्येके आकाशवन्निहशब्दस्यापिनित्यत्वंव्यंजकस्यचिरस्थायित्वेनसर्वदोपलभ्यमानत्वे १२

ध्वनिशब्देन वैखरीवागुच्यते स्फोटशब्देन मध्यमावागित्यन्ये अत एव सर्वे सर्वार्थवाचका इति प्रवादः शब्दमात्रस्यार्थ
मात्रस्य च प्रत्यायनानर्हत्वेन ततो भेदाभावात् अत एव नित्यः शब्दार्थसम्बन्ध इति प्रवादः अत एवोक्तं योगवाचस्पत्ये
सर्वे च शब्दाः सर्वार्थाभिधानसमर्था ईश्वरसंकेतस्तु प्रकाशक इति अत एवोक्तं न्यायवाचस्पत्ये सर्गादिभुवां महर्षिदे
वानामीश्वरेण साक्षात्कृतः संकेतस्तु व्यवहाराद्वाऽस्मदादीनामपि सुग्रहः संकेत इति सर्वेषामर्थानां सर्वशब्दैः सम्ब
न्धस्य योगिप्रत्यक्षगम्यत्वेन तेषामुभयत्वपरात्मत्वात् अत एवोक्तं हरिणा व्यवहाराय नियमः संज्ञायाः संज्ञिनि
क्वचिदिति क्वचित्संज्ञिनि संज्ञाया नियमो व्यवहारायेत्यर्थः यथाऽस्मदीयशास्त्रे वृद्धिशब्देनादैच एव ग्राह्या इति वृद्धिव्यापा
रात्यागवाचकस्य वृद्धिव्यापारेण वाचकताकल्पनं शक्यते शब्दार्थसम्बन्धस्य नित्यत्वादिति तदाशयः अत एव घटपटेऽसंके
ते सति न तदर्थबोधो भवत्येव ननु व्यवहाराय नियमस्त्वयुक्तम् वृद्धिरादैजित्यादिसूत्राणां संकेतप्रकाशकत्वेन विधित्व
स्यैव न्याय्यत्वादिति चेत् सत्यम् यथा घटे विद्यमान एव नीलो घट इति नीलस्य सम्बन्धः पुरुषेण बोध्यते न तु तत्र नीला
योगः क्रियते तत्र स्वनील एव न पीत इति नियमः फलति तदुक्तं हरिणा वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः
अकृत्रिमोऽभिसम्बन्धो विशेषणविशेष्यवदिति शक्त्यवच्छेदः शक्तिसंकोचः विशेषणविशेष्यवदित्यस्यार्थ उक्त एव अत एव
तत्र वाचकताबोधनेऽपि तदनन्तरादनादिशब्दार्थसम्बन्धस्यानित्यत्वं पाणिन्यादिसंकेतग्राह्यत्वात् संज्ञानामनित्यत्व प्रवादः

श्री· दुर्गा· व·वा· ह· १२

13

हरिशब्दस्याश्वादौ तेनैव प्रयोग इत्यत्र पाणिनीच्छाया एव नियामकता न यदृच्छाशब्दत्वव्यवहारः अतएव च लोकेच्छया संज्ञाः
क्रियन्त इत्यपि प्रवादः गौणमुख्यविभागस्तु प्रसिद्धिनिबंधन एव अतएवोक्तं हरिणा सर्वशक्तेस्तु तस्यैव शब्दस्यानेक
धर्मणः प्रसिद्धिभेदाद्गौणत्वं मुख्यत्वं चोपवर्ण्यते इत्यत्र गौणमुख्यार्थवाचकः शब्द एक एव प्रकरणादिरूपनिमित्ताभा
वाच्च न युगपत्सर्वस्य प्रकाशनम् सर्वशक्तिरित्यस्य व्याख्यानमनेकधर्म इति गोशब्दस्य गोत्वजातौ प्रसिद्ध्या मुख्यत्वं वाहि
केत्वप्रसिद्ध्या गौणत्वमित्यर्थः शक्तिर्नाम शब्दार्थयोस्तादात्म्यमेव अतएव श्रोतव्यर्थपदार्थे दृष्ट्वा वाचकजिज्ञासया कोय
मिति प्रश्ने देवदत्तोयमित्युत्तरम् अतएवोक्तं पातञ्जलभाष्ये संकेतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्म
को योयं शब्दः सोर्थो योर्थः स शब्द इति इतरेतराध्यासः परस्परात्मकतारोपः अन्यस्मिन्नन्यधर्मावभासोध्या
सः स्मृत्यात्मक इत्यनेन ज्ञान एव संकेतः शक्तिबोधक इति सूचितम् कः शब्दः कोर्थः इति प्रश्ने घट इत्येव शब्दो घ
ट इत्येवमर्थ इति समानाधिकरण्येनोत्तरदर्शनाच्छब्दार्थयोरध्याससिद्धिः अतएव रामेति द्व्यक्षरं नाम मानभङ्गः पिना
किन इत्यादौ शब्दार्थयोरप्यभेदेन व्यवहारः ओमित्येकाक्षरं ब्रह्मेत्यादिश्रुत्यादावपि अभेदेनैव निर्वाहः अभेदस्याप्यस्त
त्वाच्च भेदव्यवहारोपि अस्यार्थस्यायं वाचक इति अतएवोक्तं हरिणा तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशक इति
अत्रैवशब्देन तादात्म्यस्यातात्विकत्वं सूचितम् यत्तु शब्दशब्दार्थयोरभेदः अग्न्यादिशब्दैर्मुखदाहापत्तिरिति तन्न १२

उक्तयुक्त्यातात्पर्यस्यारोपितत्वेनदाहकत्वादिशक्तेरभावात् लक्षणायाहेतुत्वन्नरत्वमस्तुअर्थबोधकतारूपायाभगवदिच्छा यावाशक्तेर्लाक्षणिकत्वेप्यविशिष्टत्वात् ननुगङ्गापदस्यतीरेशक्तिस्वीकारेस्वारसिकप्रयोगापत्तिरितिचेन्न तत्रगङ्गाय दस्याप्रसिद्धत्वात् अतएवहरिपदस्यऽकीवादिवाचकत्वाविशेषेपिनभेकादितितेषांप्रत्ययः अतएवचहन्धातोर्गतौशक्ति तौस्त्येपिनस्वारसिकःप्रयोगइतिदिक् घटःकर्मत्वमानयनंकृतिरित्यादौपदार्थोपस्थित्यादिसत्वादन्वयबोधापत्तिवारणा याकाङ्क्षाहेतुः यस्यपदस्ययत्पदव्यतिरेकप्रयुक्तान्वयाननुभावकत्वंतस्यतत्पदवत्वमाकाङ्क्षा ननुनीलपदंविनापि घटमानयेत्यादावन्वयदर्शनान्नीलघटयोराकाङ्क्षासिद्धये अभेदबोधाभावेसमानविभक्तिकपदान्तराभावएवप्रयोजक कोवाच्यः तथाच घटःकर्मत्वमितिनिराकाङ्क्षेतिव्याप्तिरितिचेन्न तत्राकाङ्क्षासत्वेपियोग्यताविरहेणशाब्दबोधा भावात् एकपदार्थेपरपदार्थसंसर्गयोग्यतावैह्निनासिञ्चतीत्यादावयोग्यत्वान्नबोधः ननुएकेत्यादिपदविशेषणेवा पदार्थविशेषणेवा आद्येएकधात्वर्थपदोपस्थाप्ययोःफलव्यापारयोःपरस्परमन्वयबोधानापत्तिः द्वितीयेत्वप्रमेयत्वेप्रमे यत्वमित्यादौपदार्थभेदाभावाद्व्याप्तिरितिचेन्न पदार्थेपदार्थसंसर्गस्यविवक्षितत्वात् अव्यवधानेनोपस्थितिरासत्तिः तेनगिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौनबोधः ननुपदजन्यसमूहालम्बनेसकलपदार्थोपस्थितिसत्वादासत्तिरस्त्वेव अन्यथाकाव्यादावन्वयवाक्याच्छाब्दबोधानापत्तिरितिचेत्सत्यम् अव्यवहितपदार्थोपस्थित्यनुकूलव्यापारएवआसत्तिः प्

श्री॰ दुर्गो॰ व॰ वा॰ सू॰ १४

15

कपदानेतरमयवपदेकविडवारणेकवितनीष्ठेवव्यापारः स्त्रीकादौयदनात्वर्थप्रदर्शनायैवयोजनावाक्यम् शुकवा
केपिशिष्टकस्यैवव्यापारः कारकत्वेनामक्रियान्वितकर्तृत्वकर्मत्वादिषट्कान्यतमान्वयित्वम् इहयातोविभागा
नक्तलव्यापारानक्तलव्यापारोर्थइतिविभागान्नयफलाश्रतात्क्रोः कर्मत्वेनितार्किकाः तन्न फलद्वयार्थकत्वेगोः
पयोदोग्धीतिपैचम्यनापत्तेः नवायादानत्वविवक्षयासेतिवाच्यम् तथासतिग्रामात्मजतीत्यस्याप्यापत्तेः क्रिया
न्वितेतिविशेषणस्यव्यर्थतापत्तेः यदपिक्रियान्वितविभक्त्यर्थान्वयित्वेकारकत्वमितितदपिन वर्षासुभवतिवर्षाभू
रित्यत्रविभक्त्यभावेनकारकत्वानापत्तेः तन्मतेलक्षणाभ्युपगमेनविभक्त्यन्वसेयानस्याप्यसंभवात्
अन्यथानेवनटस्युतमित्यादौकारकत्वानुस्युतयोरित्युदाहरणानापत्तेः पृतेनफलाश्रयत्वेकर्मत्वमित्यपास्तम् गांदो
ग्धीत्यत्रापाणेरित्यलम् अनादित्वमनयग्रहत्वमभ्युदययोग्यत्वंवासाधुत्वेबोधकत्वेनतन्वमित्युक्तौगर्ग्यादावतिव्याप्तेः
शक्तत्वेनत्वमित्युक्तौविकरणानामसाधुत्वापत्तेः दित्सुभादिसंज्ञास्वभ्युदययोग्यत्वाभावेअनयग्रहसादेवसाधुत्वम्
देशभाषयाशक्तिपमाणानांक्रकीमज्वोत्यादिनामसाधुत्वमेव आधुनिकनाम्नोसंकल्पादौप्रयोगस्तुअनेत्यैवहस्तेक्र
र्यादित्यादिनियमात् असाधुशब्दानांनानेन्यान्नशक्तते अर्थबोधस्तुसाधुस्मरणद्वाराअनुत्पन्नानांतुशक्तिभ्र
माद्दोषः अनेनाहः बोधकतातृपाशक्तिपरत्वेशेषांपिडर्वारैवेति अयोध्यापावकेकोणेदश्णगवतसमि ६

15 ग्रामोस्तिलक्ष्मणपुरेवसेत्तत्राकरोदिमम् इतिश्रीमद्देवीदत्तात्मजरामसेवकतन्त्रभट्टाचार्य्यकृत्स्नमित्रकृतोवा
दमयाकरः संपूर्णंसमाप्तम् शुभंहरिॐ

श्लो· २४२

नं- १४१

प· १५